दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-242
1
जून 24, 2026
Website- www.himsanskritam.com
Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लदशमी
आषाढः 10 प्रविष्टांशः मङ्गलमयः भवेत्

2 सर्वोच्चन्यायालयेन त्रिनवत्युत्तरैकोनविंशति-तमवर्षस्य बौ-बाजार विस्फोटस्य दोषिनः रशीद खान् इत्यस्य समयपूर्वमुक्ति-विषये दिल्ली-उच्चन्यायालयस्य आदेशः स्थगितः

3 कश्मीरस्य 'पीएमश्री' विद्यालयेभ्यः शिक्षां ग्रहीष्यति हिमाचलम् शिक्षा मन्त्रिणः रोहितठाकुरस्य नेतृत्वे शैक्षणिकदलं पञ्चदिवसीय-अध्ययन-प्रवासे

5 कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये स्नातक- (बी.ए.) स्नातकोत्तर- (एम.ए., पीएच. डी.) पाठ्यक्रमेषु प्रवेशप्रक्रिया आरब्धा

## अर्जेण्टीना-देशस्य तारकभूतः नायकः

### लियोनेल मेस्सी अष्टादश गोल्स् इति लक्ष्यावाप्तिं कृत्वा इतिहासं निर्मितवान्



फीफा विश्वकप इति क्रीडायां अर्जेण्टीना-देशस्य तारकभूतः नायकः लियोनेल मेस्सी इत्ययं विश्वकप-क्रीडायाः इतिहासे सर्वाधिकं अष्टादश गोल्स् इति लक्ष्यावाप्तिं कृत्वा इतिहासं निर्मितवान्। मेस्सी जर्मनीदेशस्य मिरोस्लाव् क्लोसे इत्यस्य षोडश गोल्स् इत्यभिलेखम् अतिक्रमितवान्। गतरात्रौ संजाते सुपराख्ये सङ्घर्षे अर्जेण्टीना-देशः अमेरिकादेशस्य आर्लिंग्टन्-नगरे स्वस्य ग्रूप्-जे-क्रीडायां आस्ट्रिया-देश-दलम् द्वि-शून्याङ्कान्तरालेन पराजित्य राउण्ड-आफ्-32 इत्यस्मिन् स्थानं प्राप्तवत्। अन्यस्मिन् सङ्घर्षे, अद्य अमेरिका-देशस्य सान्ता क्लारा-नगरे ग्रूप्-जे-स्पर्धायां अल्जीरिया-देशः प्रथमवारं क्रीड्यमानं जोर्डन्-देशम् द्वि-एकाङ्काङ्कान्तरेण पराजयत।

## चेन्नई-तिरुचिरापल्लि-शिक्षक-नियुक्ति-परीक्षा-विकृतिकरण-प्रकरणे प्रवर्तन निदेशालयस्यान्वेषणम्



चेन्नई-तिरुचिरापल्लि-शिक्षक-नियुक्ति-परीक्षा-विकृतिकरण-प्रकरणे प्रवर्तन निदेशालयः कोयम्बतूर-मदुरै-नगरेषु अष्टादशसु स्थलेषु अन्वेषणं कृतम्। निदेशालयः उक्तवान् यत् एतत् कार्यं षड्विंशत्यधिक-द्विसहस्रतमे वर्षे केन्द्रीय-अपराध-शाखया पञ्जीकृतस्य प्रथम-सूचना-वृत्तस्य आधारेण क्रियते।

## राष्ट्रपतिना द्रौपदी-मुर्मू-महोदयया नवदेहल्यां राष्ट्रपति भवने द्वितीये नागरिक-अलंकरण-समारोहे पद्म पुरस्काराः प्रदत्ताः



**हिमसंस्कृतवार्ता नवदेहली।** राष्ट्रपति द्रौपदी मुर्मु महोदया राष्ट्रपतिभवने आयोजिते द्वितीये नागरिक-सम्मान-समारोहे पद्मपुरस्कारान् अयच्छत्। पद्मपुरस्काराः देशस्य सर्वोच्चनागरिकसम्मानेषु अन्यतमाः सन्ति। एते पुरस्काराः पद्मविभूषणं, पद्मभूषणं, पद्मश्रीः इति तिसृषु श्रेणीषु दीयन्ते। पत्रकारः पी. नारायणनः साहित्य-शिक्षाक्षेत्रे पद्मविभूषणेन, पूर्वन्यायाधीशः के.टी. थॉमसः च समाजसेवायै पद्मविभूषणेन सम्मानितौ अभवताम्। पूर्वटेनिसक्रीडकः विजय अमृतराजः, अभिनेता ममूटी, पार्श्वगायिका अलका याज्ञिक च पद्मभूषणपुरस्कारेण सम्मानितौ (सम्मानिताः) अभवन्। सर्वकारेण अस्मिन् वर्षे आहत्य १३१ (एकत्रिंशदधिकशतं) पद्मपुरस्काराणां घोषणा कृता आसीत्। एतेषु पञ्च पद्मविभूषणानि, १३ पद्मभूषणानि, ११३ पद्मश्रीपुरस्काराः च सम्मिलिताः सन्ति। १९५४ तमे वर्षे आरब्धानाम् एतेषां पुरस्काराणां घोषणा प्रतिवर्षं गणतन्त्रदिवसस्य अवसरे क्रियते। कला, साहित्यं, शिक्षा, क्रीडा, चिकित्सा, समाजसेवा, विज्ञान-अभियान्त्रिकी (इंजीनियरिंग), सार्वजनिककार्याणि, व्यापार-उद्योगाः च इत्यादिक्षेत्रेषु विषयेषु च विशिष्टायै असाधारणायै च उपलब्धये एते पुरस्काराः प्रदीयन्ते।

## गृहमन्त्री अमितशाहः अकथयत् यत् अनुच्छेद-सप्तत्युत्तरत्रिशतम् इत्यस्य निरसनेन श्यामा-प्रसाद-मुखर्जीवर्यस्य स्वप्नाः साकारीभूताः



**हिमसंस्कृतवार्ता।** उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च डॉ. श्यामा प्रसाद मुखर्जी इत्यस्य बलिदानदिने श्रद्धाञ्जलिम् अर्पितवन्तौ। सामाजिक-प्रसार माध्यमे, उपराष्ट्रपतिः डॉ. मुखर्जी-वर्यं दूरदर्शी नेता, प्रख्यातः शिक्षाविद्, निष्ठावान् देशभक्तश्चेति वर्णितवान्। प्रधानमन्त्रिणा मोदिना च लिखितं यत् डॉ. मुखर्जी वर्यः देशस्य विकासाय स्वस्य जीवनं समर्पितवान् इति। सः अवदत् यत् डॉ. श्यामा प्रसाद मुखर्जी इत्यस्य अविचलः विश्वासः, सार्वजनिकजीवनस्य साहसः, राष्ट्रहितं प्रति प्रतिबद्धता च कुलानुकुलान् यावत् प्रेरयन्तीति। केन्द्रीय-गृह-मन्त्री अमितशाहः अवदत् यत् अनुच्छेद-सप्तत्युत्तरत्रिशतम् इत्यस्य निरसनेन डा. श्यामाप्रसाद मुखर्जीवर्यस्य दूरदृष्टिः साकारीभूतेति। श्रीशाहः डा. श्यामा प्रसाद मुखर्जी इत्यस्य पुण्यतिथौ श्रद्धाञ्जलिम् अर्पितवान्, सः भारतस्य महत्सु नेतृषु अन्यतमः इति वर्णयन्, तस्य योगदानं देशस्य एकतायाः अखण्डतायाः च संरक्षणे साहाय्यम् अकरोदित्यपि अवोचत्। नेफेड-संस्थायाः नीलामी पोर्टल इत्यस्य उद्घाटनकाले नवदेहल्यां जनसमूहं सम्बोधयन् श्रीशाहः अवदत् यत् जून-मासस्य त्रयोविंशति दिनाङ्कः भारतीय जनता पार्टीति दलस्य कार्यकर्तृभ्यः विशेषमहत्त्वं धारयति, यतो हि अयं दिवसः श्यामा प्रसाद मुखर्जी-वर्यस्य राष्ट्रिय एकतायै स्वप्राणस्य बलिदानस्य दिवसः अस्तीति।

अस्मिन् अवसरे, श्रीशाहः इत्यपि उक्तवान् यत् भारतीय-राष्ट्रिय-कृषि-सहकार-विपणन-सङ्घः नाफेड् इत्येषः देशस्य प्रायः चतुस्सप्तति-लक्षं कृषकाणां साहाय्यं करोति। सः नवदेहल्यां नाफेड्-संस्थायाः नीलामी-पोर्टल् इत्युक्ते 'NAFEX.in' इत्यस्य उद्घाटनं कृतवान्।

## सुभाषितम्

**सत्येन रक्ष्यते धर्मो,**
**विद्या योगेन रक्ष्यते।**
**मृजया रक्ष्यते रूपं,**
**कुलं वृत्तेन रक्ष्यते।।**
**(महाभारत, उद्योगपर्व- ३४/३९)**


अर्थात्- सत्य से धर्म की रक्षा होती है। निरंतर अभ्यास (योग) से विद्या की रक्षा होती है। स्वच्छता से रूप (सौंदर्य) की रक्षा होती है और अच्छे सदाचार (चरित्र) से कुल (वंश) की प्रतिष्ठा की रक्षा होती है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारत-अमेरिका-देशयोर्मध्ये रक्षा-सहभागित्वम् निरन्तरं वर्धमानम् अस्ति-राजदूतः सर्जियो गोर्



संयुक्तराज्यामेरिकादेशः भारतस्य एम-त्रिपल-सेवेन-ए-टू अल्ट्रा-लाइट हावत्स इत्यस्मै त्रिशंदधिकद्विशत-मिलियन् यू. एस्. डालर् इत्यस्य सस्टेनमेण्ट् पैकेजाख्यं पुटकम् अघोषयत्। सामाजिक-प्रसार-माध्यमे भारते अमेरिकादेशस्य राजदूतः सर्जियो गोर् इत्येषः अवदत् यत्, भारत-अमेरिका-देशयोर्मध्ये रक्षा-सहभागित्वम् निरन्तरं वर्धमानम् अस्ति, प्रस्तावितविक्रयः समाप्त्यर्थं देशः सज्जश्चास्तीति ।

## सर्वोच्चन्यायालयेन त्रिनवत्युत्तरैकोनविंशति-तमवर्षस्य बौ-बाजार विस्फोटस्य दोषिनः रशीद खान् इत्यस्य समयपूर्वमुक्ति-विषये दिल्ली-उच्चन्यायालयस्य आदेशः स्थगितः



सर्वोच्चन्यायालयेन त्रिनवत्युत्तरैकोनविंशतितम-वर्षे कोलकाता-बउ-बाजार-विस्फोटन-प्रकरणस्य आजीवन-दण्डादेशितस्य दोषिनः समयपूर्व-मुक्तेः दिल्ली-उच्चन्यायालयस्य आदेशः स्थगितः। न्यायमूर्तयः पी. के. मिश्रा, सञ्जीवसचदेवा इत्येतयोः पीठः पश्चिमबङ्ग-सर्वकारस्य याचनायाम् अन्तरिम-आश्वस्तिम् अददात्, यस्मिन् उच्चन्यायालयस्य पञ्च-जूनेति दिनाङ्कस्य आदेशस्य विरोधः कृतः, यत्र सप्तसप्तति-वर्षीयस्य अपराधिनः मो. रशीद खान इत्यस्य मोचनादेशः आसीत्। सर्वोच्चन्यायालयेन राज्यसर्वकारस्य याचनानुसारं टाडा इत्यस्य कठोर-व्यवस्थायाः अन्तर्गतं दोषीति घोषिताय खान् इत्यस्मै अपि सूचना दत्ता। विषयेऽस्मिन् न्यायपीठः आरोपितस्य भूमिकाः सर्वथा भिन्नाः इति कथयन् खानः एव घटनायाः "सूत्रधारः" इति सूचितवान्।

## राष्ट्रिय-सुरक्षा-परामर्शकः अजित डोभालः अवदत् यत् होर्मुज़-जलसंधेः उद्घाटनेन आसंसारं ऊर्जा-सुरक्षायाः सुदृढीकरणं भविष्यतीति

अमेरिका-इरान्-देशयोर्मध्ये कृतस्य एम. ओ. यू. इति सहमति-पत्रस्य भारतं स्वागतम् अकरोत्। नवदेहल्यां षोडशीं ब्रिक्स्-राष्ट्रिय-सुरक्षा-परामर्शदात्-सभाम् सम्बोधयन् राष्ट्रिय-सुरक्षा-परामर्शकः अजित डोभालः अवदत् यत् अनेन विकासेन सम्पूर्ण विश्वस्मिन् ऊर्जा-सुरक्षायाः सुदृढीकरणं भविष्यतीति। सः होर्मुज़-जलसंध्याः उद्घाटनस्य अपि स्वागतम् अकरोत्, प्रकाशयच्च यत् एतत् आपूर्तिशृङ्खलायाः बाधाम् अपसारयितुं, उर्वरक रसायनादीनां वस्तूनां अभावान् परिहर्तुं च साहाय्यं करिष्यतीति। उदयोन्मुखान् सुरक्षाविषयान् प्रकाशयन् श्रीडोभालः अवोचत् यत् पारम्परिकेतर-प्रतिरोधाः राष्ट्रियसीमाम् अतिक्रम्य पारम्परिकप्रतिक्रियां चालयितुं क्षमताञ्च विकसितवन्तः इति।




## राज्यसर्वकारेण एस्मा (ESMA) प्रस्थापितः, एच.आर.टी.सी. कर्मचारिणां प्रस्तावित-संघर्षस्य उपरि वैधानिक-अवरोधः




**हिमसंस्कृतवार्ताः- शिमला ।**
हिमाचलप्रदेशसर्वकारेण हिमाचल- पथ- परिवहन-निगमस्य (एच.आर.टी.सी.) कर्मचारिणां प्रस्तावित-कार्यविरामात् (हड़तालात्) पूर्वं कश्चन महान् प्रक्रमः उत्थाप्य सम्पूर्णप्रदेशे 'आवश्यक- सेवा- अनुरक्षण-अधिनियमः' (Essential Services Maintenance Act- एस्मा) प्रवर्तितः। परिवहनविभागेन प्रसारितायाः अधिसूचनायाः अनुसारं, एच.आर.टी.सी. कर्मचारिणाम् उपरि आगामि-षण्मासान् (६ मासान्) यावत् कार्यस्थगनकरणे प्रतिबन्धः स्थास्यति।
सर्वकारेण आदेशे कथितं यत् सार्वजनिक- परिवहनम् एका आवश्यकी सेवा वर्तते। बस-सेवा सुबाधिता सती सामान्यजनानां, विद्यार्थिनां, रोगिणां तथा च आवश्यकानां वस्तूनां प्रदाने (आपूर्ति) प्रभावः भवितुं शक्नोति। एतदेव ध्यात्वा जनहिते 'एस्मा' प्रवर्तितः कृतः अस्ति। सर्वकारेण एच. आर. टी. सी. संस्थायाः प्रबन्धनिदेशकाय (एमडी) निर्देशाः दत्ताः यत् अधिसूचनायाः कठोरतापूर्वकं पालनं सुनिश्चितं क्रियेत। अनेन साकमेव सर्वान् उपायुक्तान् (डी. सी.) आरक्षक- अधीक्षकान् (एस. पी.) च आवश्यक-सहयोगप्रदानाय निर्देशाः कृताः सन्ति। उल्लेखनीयं वर्तते यत् एच.आर.टी.सी. कर्मचारिसङ्घेन प्रलम्बितानां वित्तीयदेयतानाम् अन्यासां च याचनानां कृते २५ जून् दिनाङ्कतः कार्यस्थगने गन्तुं घोषणा कृता आसीत्। परन्तु सर्वकारस्य अस्य निर्णयस्य परं अधुना कर्मचारिणां प्रस्तावित-संघर्षस्य उपरि वैधानिकी बाधा संजाता।

### किम् अस्ति 'एस्मा'?

एस्मा (Essential Services Maintenance Act) अर्थात् 'आवश्यक- सेवा- अनुरक्षण-अधिनियमः' तादृशः कश्चन नियमः अस्ति, यं सर्वकारः तदा प्रवर्तयति यदा तस्मै प्रतीयते यत् कस्याञ्चित् आवश्यकसेवायां संघर्षेण कार्यविरामेण वा सामान्यजनतायै गम्भीरं कष्टं भवितुं शक्नोति।
एच. आर. टी. सी. प्रकृते अस्य अर्थः अस्ति यत् एच. आर. टी. सी. कर्मचारिणः संघर्षं कर्तुं न शक्नुवन्ति। कोऽपि कर्मचारी संघर्षे सम्मिलितः भवितुं न शक्नोति, न च अन्यान् एतदर्थं प्रेरयितुं शक्नोति। यदि कश्चित् एस्मा-प्रवर्धने सत्यपि संघर्षं करोति, तर्हि तस्य विरुद्धं वैधानिकी प्रशासनिक्यश्च प्रक्रमाः कर्तुं शक्यन्ते। अस्मिन् निलम्बनं (सस्पेंशन), वेतनकर्तनम् अनुशासनात्मककार्याणि अथवा नियमान्तर्गतं अन्ये दण्डाः अन्तर्भवितुं शक्नुवन्ति। सर्वकारः सामान्यतः 'एस्मा' नियमं सीमित- अवधये एव प्रवर्तयति। हिमाचले एच. आर. टी. सी. कर्मचारिणां प्रकृते एषः ६ मासानां कृते प्रवर्तितः अस्ति।

### सर्वकारः 'एस्मा' कदा प्रवर्तयति?

> बस-यानं सार्वजनिकपरिवहनं च > स्वास्थ्यसेवाः (चिकित्सा) > विद्युत् व्यवस्था > जलापूर्तिः > अग्निशमनसेवाः > अन्याः आवश्यकाः सर्वकारीयसेवाः

## नवदेहल्यां वाणिज्य-उद्योगमन्त्री पीयूष गोयलः अमेरिकादेशस्य व्यापार-प्रतिनिधिना सह अमिलतत्



भारतेन अमरीकादेशेन च उच्चस्तरीय व्यापार-वार्ताः आरब्धाः। अमेरिकादेशस्य शुल्कनीतौ परिवर्तनात् वर्षस्य प्रारम्भे वार्तया निश्चितः द्विपक्षीय व्यापार-सन्धेः प्रारूपः बाधितः अभवत्। तस्य संरक्षणाय पुनः सन्तुलनाय च एषा वार्ता आयोजिता। नवदेहल्यां वाणिज्य-उद्योगमन्त्री पीयूष गोयलः अमेरिकादेशस्य व्यापार-प्रतिनिधिना जेमिसन-ग्रीर-महोदयेन भारतस्थ-अमेरिका-राजदूतेन सर्जियो-गोर-महोदयेन च समम् अमिलत्। उभयपक्षौ चतुर्विंशति-जुलाई-दिनाङ्कात् पूर्वम् अन्तरिम व्यापार-सन्धिं सम्पादयितुं इच्छतः, यस्मिन् दिने व्यापार-सहयोगिभ्यः आयात-वस्तुषु अमरीकादेशेन आरोपितं दश-प्रतिशतम् अस्थायी शुल्कं समाप्तं भविष्यति। फरवरी-मासे उद्घोषितस्य प्रारूप-सन्धेः संशोधनं वार्तायाः केन्द्रबिन्दुः आसीत्। मूल-प्रारूपः शुल्क-प्रतिबद्धताम् आधृत्य निर्मितः आसीत्, परन्तु राष्ट्रपति डोनाल्ड ट्रम्प इत्यनेन उद्घोषितानां व्यापक-शुल्कानां अमरीकादेशस्य सर्वोच्च न्यायालयेन निराकरणात् ताः प्रतिबद्धताः अनिश्चिताः अभवन्।

## अयोध्यायाः राममन्दिरे दान-अर्पण-विषये कथित-अनियमिततानाम् अन्वेषणं कुर्वता अन्वेषण-दलेन प्रारम्भिक अन्वेषण-प्रतिवेदनं प्रस्तुतम्



अयोध्यायाः राममन्दिरे दान-अर्पण-विषये कथित-अनियमिततानाम् अन्वेषणं कुर्वता त्रिसदस्यात्मक-विशेष-अन्वेषण-दलेन प्रारम्भिक अन्वेषण-प्रतिवेदनं प्रस्तुतम्। दलप्रमुखः लखनऊ-आयुक्तः विजय-विश्वास-पन्तः अतिरिक्त-मुख्य सचिवाय गृह-विभागस्य संजय प्रसादाय प्रतिवेदनं समर्पितवान्। प्रतिवेदनं समर्प्य दलप्रमुखः अवदत् यत् इदं प्रारम्भिक प्रतिवेदनम् अस्ति। मन्दिर-न्यासेन दानराशेः दुरुपयोगस्य आरोपाः प्रकटिताः इति कारणात् राज्य-सर्वकारेण अस्मिन् मासे त्रयोदश-दिनाङ्के उच्चस्तरीया समितिः गठिता। दल सदस्यैः गत सप्ताहे अनेकेषां सन्दिग्धानां मन्दिर-न्यास-पदाधिकारिणां च पुरतः प्रश्नोत्तराणि कृतानि। प्रतिवेदने प्रदत्ताभ्यः संस्तुतिभ्यः आधृत्य अग्रिमं कार्याचरणं शीघ्रमेव अपेक्ष्यते।

# कश्मीरस्य 'पीएमश्री' विद्यालयेभ्यः शिक्षां ग्रहीष्यति हिमाचलम्

## शिक्षा मन्त्रिणः रोहितठाकुरस्य नेतृत्त्वे शैक्षणिकदलं पञ्चदिवसीय-अध्ययन-प्रवासे



**हिमसंस्कृतवार्ताः — शिमला ।**
हिमाचलप्रदेशस्य विद्यालयीयां शिक्षाम् अधिकाधिकं आधुनिकीं, गुणवत्तापूर्णां तथा च नवाचार-आधारितां विधातुं राज्यस्य कश्चन उच्चस्तरीय-शैक्षणिकदलं शिक्षामन्त्रिणः रोहितठाकुरस्य नेतृत्त्वे पञ्चदिवसीय-अध्ययन-प्रवासे जम्मू-कश्मीरं प्राप्तवान्। एतद् दलं तत्रत्यानां 'पीएमश्री' (PM SHRI) विद्यालयानां कार्यप्रणालीनां, नवाचाराधारित-शिक्षणपद्धतीनां, उत्कृष्ट-शैक्षणिक-प्रतिरूपाणां (मॉडलों का) च अध्ययनं करोति, येन एतेषाम् अनुभवानां हिमाचले प्रयोगः कर्तुं शक्येत। प्रथमे दिने शिक्षामन्त्रिणः अधिकारिणां च दलेन श्रीनगरस्थस्य 'पीएम श्री राजकीय-छात्र-वरिष्ठमाध्यमिक-विद्यालयः हायर बरजुल्ला-रावलपोरा' इत्यस्य निरीक्षणं कृतम्। अस्मिन् अवसरे मन्त्रिणा शिक्षकैः, अधिकारिभिः, छात्रैः च सह संवादं कृत्वा विद्यालये उपलपभ्यमानानां सुविधानां, शैक्षणिकगतिविधीनां, नवाचाराधारित-शिक्षणव्यवस्थायाश्च सूचना प्राप्ता। छात्रैः सह तेषां शिक्षणानुभवानां भविष्यस्य योजनानां च उपरि अपि चर्चा विहिता। शिक्षामन्त्रिणा रोहितठाकुरेण कथितं यत् हिमाचलप्रदेशे १९९ विद्यालयानां चयनं 'पीएम श्री' विद्यालयरूपेण विहितम् अस्ति। एतेषु विद्यालयेषु राष्ट्रियशिक्षानीति-२०२० (NEP-2020) इत्यस्यानुरूपं छात्राणां समग्रविकासे विशेषं ध्यानं दीयते। शिक्षामन्त्रिणा अवदत् यत् अनेन शिक्षाव्यवस्थां अधिकां प्रभावशालिनीं विधातुं तथा च छात्रेभ्यः गुणवत्तापूर्णं आधुनिकं च शिक्षणवातावरणं प्रदातुं साहाय्यं प्राप्स्यते।

### शिक्षाव्यवस्थायाम् अवधानम्

समग्रशिक्षा-निदेशकः राजेशशर्मा अवदत् यत् जम्मू-कश्मीरस्य 'पीएम श्री' विद्यालयानाम् उत्कृष्टकार्यप्रणालीनां नवाचाराणां च अध्ययनं कृत्वा हिमाचलस्य शिक्षाव्यवस्थां अधिकाधिकं छात्रकेन्द्रितां प्रभावशालिनीं च विधातुं दिशायां कार्यं विधास्यते।

# सर्वकारः पुनः पुनः निर्णयान् परिवर्तयति, जयरामस्य आरोपः, जनादेशचौर्याय रच्यन्ते षड्यन्त्राणि



**हिमसंस्कृतवार्ताः — लघ्वीकाशी मण्डी।**
पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः तत्तापानीक्षेत्रे माध्यमैः (मीडिया) सह अनौपचारिके सम्भाषणे राज्यस्य काङ्ग्रेससर्वकारस्य कार्यप्रणालीं प्रति तीक्ष्णान् प्रश्नान् उत्थाप्य इमं दिशाहिनं विजनहीनं (दृष्टिशून्यं) च सर्वकारं प्रख्यापितवान्। तेन आरोपः कृतः यत् काङ्ग्रेसनेतारः कार्यकरणस्यापेक्षया षड्यन्त्ररचने निपुणाः सन्ति, पराजयानन्तरमपि सत्तायाः दुरुपयोगमाध्यमेन जनादेशं हर्तुं प्रयतन्ते। जयरामठाकुरः अवदत् यत् न्यायालयस्य आदेशानन्तरं बलपूर्वकं कारितानां स्थानीयनिकायानां पञ्चायतीराज-निर्वाचनानां च परिणामाः आगताः सप्ताहाः अतीताः, परन्तु सर्वकारः जानन् एव ब्लॉक-समिति-जिलापरिषद्-अन्यनिकायेषु अध्यक्ष-उपाध्यक्षयोः निर्वाचनतिथयः न घोषयति।
एतत् एतदर्थं क्रियमाणं वर्तते, येन भारतीयजनतापक्ष-समर्थितानां विजितप्रतिनिधीनां उपरि 'विजिलेंस' अन्वेषणस्य, स्थानान्तरणानां (तबादलों), प्रशासनिकप्रक्रियाणां च भयं प्रदर्श्य प्रभावः स्रष्टुं शक्येत। सर्वकारेण सार्धद्विसहस्रात् (२५००) अधिकानां जनहितसंस्थानां अकारणमेव स्थगनस्य (बंद करने की) आलोचनां कुर्वन् सः अवदत् यत् सर्वकारः पूर्वं विद्यालयेभ्यः शिक्षकाणां स्थानान्तरणम् करोति, तदनन्तरं छात्रसङ्ख्यायाः न्यूनतायाः व्याजं कृत्वा विद्यालयानपि पिदधाति, यत् पूर्णरूपेण तर्कहीनं वर्तते। एतस्मात् परं, जयरामठाकुरः करसोगविधानसभाक्षेत्रस्य 'चिंडी' स्थाने राष्ट्रवादी-विचारकस्य डॉ. श्यामाप्रसादमुखर्जीमहोदयस्य पुण्यतिथौ तस्मै श्रद्धाञ्जलिम् अर्पितवान्।

# स्वास्थ्यविभागद्वारा हिमाचलप्रदेशे २८ जून दिनाङ्के आयोजयिष्यते पल्स-पोलियो-अभियानम्

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे २८ जून २०२६ तमे दिनाङ्के आयोज्यमानस्य पल्स-पोलियो-अभियानस्य सज्जतानां समीक्षार्थम् राज्यस्तरीय- प्रतिरक्षण- कार्यबल-समित्याः (टास्क फोर्स) उपवेशनं स्वास्थ्यसचिवायाः एम. सुधादेव्याः अध्यक्षतायाम् आयोजितम्। उपवेशने अभियानस्य सफल- प्रभावि- कार्यान्वयनं प्रति विभिन्नानां विभागानां भूमिकाः दायित्त्वानि च अधिकृत्य विस्तृता चर्चा विहिता। गोष्ठ्याम् आवेदितं यत् अभियानार्थम् आवश्यकस्य पोलियो-टीकाकरणस्य (वैक्सीन) आपूर्तिः प्रदेशस्य सर्वेषु मण्डलेषु विहितः अस्ति तथा च अभियानस्य सफलाय सञ्चालनाय अन्याः सर्वाः अपि आवश्यकाः व्यवस्थाः सुनिश्चिताः क्रियन्ते। स्वास्थ्यसचिवा अभियानं सफलीकर्तुं विभिन्नेभ्यः विभागेभ्यः सक्रिय-सहयोगस्य आह्वानम् अकरोत्। सा पात्रबालकान् (योग्य बच्चों) यावत् प्रापणं सुनिश्चितं कर्तुं पर्याप्त- मानवसंसाधनानाम् उपलम्भनाय, बालकानां महत्यां सङ्ख्यायां सहभागितां दृढीकर्तुं, बूथ- गतिविधीनां प्रभावी-सञ्चालनाय, गृहं गृहं गत्वा जागरूकता-सत्यापनकार्याणि, सम्यक्-पर्यवेक्षण- निरीक्षणयोः उपरी विशेषं बलं दातुं निर्देशान् अवातरत्। उपवेशने औद्योगिक- घटकेभ्यः (इंडस्ट्रियल यूनिट्स) अपि स्वकर्मचारिभ्यः श्रमिकेभ्यश्च पल्स- पोलियो- अभियानस्य बूथ-दिवसस्य च सूचनां प्रदातुं निर्देशान् प्रसारयितुं बलं दत्तं, येन कोऽपि पात्रबालकः पोलियो-औषधमात्रायाः वञ्चितः न भवेत्।
एतदतिरिच्य, अभियानं जन-आन्दोलनस्य रूपं प्रदातुं महिलामण्डलानां, स्थानीयसंस्थानां तथा च समर्पितानां क्षेत्रीयकर्मचारीणां सक्रिया सहभागिता अपि सुनिश्चिता कर्तुं बलं विहितम्।

### भारते हिमाचलप्रदेशे च पोलियो-विषाणोः स्थितिः

उपवेशनकाले ज्ञापितं यत् भारते 'वाइल्ड पोलियो वायरस' इत्यस्य अन्तिमं प्रकरणं वर्ष २०११ मध्ये पञ्जीकृतम् आसीत्। हिमाचलप्रदेशे 'वाइल्ड पोलियो वायरस टाइप-३ (पी-३)' इत्यस्य अन्तिमं प्रकरणं वर्ष २००९ मध्ये सोलनमण्डले तथा च 'वाइल्ड पोलियो वायरस टाइप-१ (पी-१)' इत्यस्य अन्तिमं प्रकरणं वर्ष २००६ मध्ये कुल्लूमण्डले पञ्जीकृतम् आसीत्।
स्वास्थ्यसचिवा अवदत् यत् पोलियो-उन्मूलनस्य उपलब्धिं सुस्थिरां स्थापयितुं निरन्तरा सतर्कता उच्च-प्रतिरक्षण- व्याप्तिः (हाई इम्यूनाइजेशन कवरेज) च अतीव आवश्यकी वर्तते। सा सर्वेभ्यः विभागेभ्यः समन्वित-प्रयासानां माध्यमेन अभियानं सफलीकर्तुं प्रत्येकं पात्रबालकं यावत् पोलियो- औषधमात्रां प्रापयितुं आह्वानम् अकरोत्। अस्मिन् उपवेशने राष्ट्रीयस्वास्थ्यमिश्रणस्य उपमिश्रणनिदेशकः डॉ. राजेशगुलेरिया, स्वास्थ्यसेवा- निदेशकः डॉ. गोपालबेरी, चिकित्साशिक्षा- अनुसन्धान- निदेशकः डॉ. राकेशशर्मा विभिन्नानां विभागानां अन्ये वरिष्ठाः अधिकारिणः अपि उपस्थिताः आसन्।



# विश्वबैंकसहयोगेन बिहारस्य नागरीयभविष्यस्य नूतनारम्भः

## “नागरीकरणम्, औद्योगीकरणम् पर्यटनञ्च—एव विकसितबिहारस्य मूलमन्त्रः” – मन्त्री नीतीशमिश्रः




**हिमसंस्कृतवार्ता— राघव नाथ झा।** बिहारराज्यमधुना विकासस्य नवचरणे समुपस्थितम् अस्ति, यत्र नगराणि केवलं निवासक्षेत्रत्वेन न परिकल्प्यन्ते, अपितु तानि आर्थिकस्वावलम्बनस्य, आधुनिकजीवनशैल्याः तथा रोजगारसृजनस्य प्रमुखकेन्द्ररूपेण विकसितानि भविष्यन्ति। एतस्मिन् उद्देश्यमार्गे नगरविकासावासविभागेन विश्वबैंकसहयोगेन आयोजितस्य द्विदिवसीयस्य ‘बिहार-अर्बन-ट्रान्सफॉर्मेशन-कार्यक्रमस्य’ अधिवेशनभवने विधिवदुद्घाटनम् अभवत्।कार्यक्रमस्य उद्घाटनसमये नगरविकासावासमन्त्री नीतीशमिश्रः स्वसम्बोधने अवदत् यत्— “विकसितबिहारस्य स्वप्नसिद्धये नागरीकरणम्, औद्योगीकरणम्, पर्यटनविकासश्च अपरिहार्याः आधारस्तम्भाः सन्ति।” विगतद्विदशवर्षेषु बिहारराज्येन विकासस्य दृढाधारभूमिः निर्मिता, अधुना तादृशनगरनिर्माणस्य समयः आगतः यानि निवेशस्य, समृद्धेः, नवीनावकाशानां च केन्द्राणि भविष्यन्ति।मन्त्रिणा उक्तं यत् नगरनिकायानां योजनासु यदि नवोन्मेषः, स्थायिविकासदृष्टिः, राजस्ववर्धनक्षमता च दृश्यते तर्हि ताः ‘अर्बन-चैलेञ्ज-निधेः’ अन्तर्गतं विशेषप्रोत्साहनं प्राप्स्यन्ति। तेन अधिकारीणः प्रेरिताः यत् तादृशानि कार्याणि क्रियन्ताम्, यानि भाविपीढिभिः परिवर्तनस्य प्रेरणास्रोतत्वेन स्मरिष्यन्ते।

### द्विवर्षावधौ सम्पत्तिकरसंग्रहे प्रायः द्विशतकोटिरूप्यकवृद्धिः

मन्त्रिणा प्रतिपादितं यत् बिहारस्य नागरीयार्थिकव्यवस्था निरन्तरं सुदृढीभवति। वित्तवर्षे २०२३–२४ मध्ये ३३२ कोटिरूप्यकपरिमितः सम्पत्तिकरसंग्रहः वित्तवर्षे २०२५–२६ मध्ये वर्धमानः ५६५ कोटिरूप्यकपर्यन्तम् उपगतः। तेन उक्तं यत् सम्पत्तिकरः नगरविकासस्य मेरुदण्डः अस्ति, अतः डिजिटलकरसंग्रहव्यवस्था अधिकसुदृढा विधास्यते।विश्वबैंकस्य आगामीदशवर्षीयसहयोगेन नागरीयकायाकल्पस्य तीव्रगमनम्मन्त्रिणा प्रोक्तं यत् बिहारस्य नागरीयपरिवर्तनस्य तीव्रतायै विश्वबैंकेन सह दीर्घकालिकसहकार्यं संस्थापितम् अस्ति। अस्याः योजनायाः अन्तर्गतं नगरनिकायानां वित्तीयस्वावलम्बनम्, नागरीयप्रबन्धनम्, परिसम्पत्तिसञ्चालनम्, नगरपालिका-वित्तव्यवस्था, नगरपालिका-बॉण्ड्-प्रणाली तथा आधुनिकनगरीययोजनाकल्पनायाः विषये विशेषप्रयत्नाः भविष्यन्ति।विभागस्य प्रधानसचिवः विनयकुमारः उक्तवान् यत् रोजगारसृजनाय वैश्विकमानकानुसारं सुविधाविस्ताराय च बिहारस्य योजनाबद्धं संरचितं च नागरीकरणम् अत्यावश्यकम्। नूतननगरपरिकल्पनाः, आर्थिकगतिविधिविस्तारः, स्मार्टवित्तीयमॉडेलाः च भविष्यतः बिहारस्य वैशिष्ट्यं भविष्यन्ति।कार्यक्रमे विश्वबैंकप्रतिनिधिः रोसाना निट्टी अपि निजीविनिवेशस्य, वित्तीयविकल्पानां, सुशासितनागरीयप्रबन्धनस्य च महत्त्वं प्रतिपादितवती।अस्यां कार्यशालायां विभागस्य वरिष्ठाधिकारीणः तथा विश्वबैंकविशेषज्ञाश्च सक्रियतया सहभागिनः अभवन्। “सुव्यवस्थितं नगरं समृद्धस्य राष्ट्रस्य प्रथमं लक्षणम्।”

# वाणिज्य-सङ्गीत-समाजशास्त्र-हिन्दी-शिक्षकाणां नियुक्तिपरीक्षाणां तिथयः घोषिताः, एवम् उपलप्स्यन्ते प्रवेशपत्राणि

हिमाचल प्रदेश सरकार
HPRCA
हिमाचल प्रदेश
राज्य चयन
आयोग

**हिमसंस्कृतवार्ताः- हमीरपुरम्।** हिमाचलप्रदेश- राज्य- चयन- आयोग- हमीरपुर- पक्षतः शिक्षकाणां विभिन्नानां श्रेणीनां पदानां नियुक्तये सङ्गणकाधारित-परीक्षायाः (CBT) तिथयः घोषिताः। आयोगस्य सचिवेन डॉ. विक्रममहाजनेन कथितं यत् वाणिज्य-शिक्षकस्य (कॉमर्स शिक्षक) 'पोस्ट कोड-२६०२०' इत्यस्य परीक्षा १४ जुलाई दिनाङ्के प्रातः नववादनतः सार्ध-दशवादनपर्यन्तं (९:०० तः १०:३०), सङ्गीत- शिक्षकस्य 'पोस्ट कोड-२६०२१' इत्यस्य परीक्षा तस्मिन्नेव दिने मध्याह्ने सार्ध-द्वादशवादनतः द्विवादनपर्यन्तं (१२:३० तः २:००) समाजशास्त्र-शिक्षकस्य 'पोस्ट कोड-२६०२९' इत्यस्य परीक्षापि तस्मिन्नेव दिने सायङ्काले चतुर्वादनतः सार्ध- पञ्चवादनपर्यन्तं (४:०० तः ५:३०) भविष्यति, यत्रैव हिन्दी-शिक्षकाणां परीक्षा १५ जुलाई दिनाङ्के प्रातः नववादनतः सायङ्काल सार्ध-पञ्चवादनपर्यन्तं त्रिषु पर्यायेषु आयोजयिष्यते। डॉ. विक्रममहाजनः अवदत् यत् परीक्षायाः एकसप्ताहपूर्वं आयोगस्य जालपुटे (वेबसाइट) hprca.hp.gov.in एकस्याः शृङ्खलायाः (लिङ्क) प्रावधानं करिष्यते, येन अभ्यर्थिनः स्वकीयम् अनुक्रमाङ्कं, प्रवेशपत्रं च अधोभारितं (डाउनलोड) कर्तुं शक्ष्यन्ति। अनुक्रमाङ्कस्य परीक्षाकेन्द्रस्य च सूचना चलभाषे (मोबाइल) लघुसन्देशस्य माध्यमेनापि प्रेषयिष्यते। सचिवेन सर्वैः अभ्यर्थीभिः नियमितरूपेण आयोगस्य जालपुटं अथवा स्वचलभाषे लघुसन्देशं विद्युत्-पत्रं च नूतनस्थितेः अवलोकितुम् आह्वानं कृतम् अस्ति।

# "लौकिकन्यायकोशः"

## "उदकविशीर्णन्यायः"

उदके क्षिप्त इति। अग्नेः अनेक- उपयोगाः सन्ति। परन्तु अयम् अग्निः जले क्षिप्तः चेत् शान्तः भवति। जलम् अग्निः इति द्वयम् अपि स्वतन्त्ररीत्या तावत् उपकारं करोति। द्वयम् एकत्र आगतं चेत् द्वयोः अपि शक्तिः नष्टा भवति। निष्फलस्य कर्मणः सूचना अस्य न्यायस्य प्रयोगः भवति। जीवनमुक्तानां संसारः अपि एवंविधः भवति।

**डा. वर्षा प्रकाश टोणगांवकर,पुणे, महाराष्ट्रम्**

# वार्ता-संवादः




**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि। अद्य मया एका विचित्रा वार्ता श्रुता। अमेरिकादेशे एकेन सप्तवर्षीयेन बालकेन पञ्चाशत् शीतवस्त्राणि युगपत् धृतानि। तेन नूतनं विश्वकीर्तिमानं रचितम्।

**नन्दिनी-** अहो! तस्य बालकस्य सोत्साहं कार्यं प्रशंसनीयम्। शीतकाले अपि जनाः द्वित्राणि एव शीतवस्त्राणि धरन्ति, परन्तु तेन पञ्चाशत् धृतानि! एतद् अतिविचित्रम्। इदानीं द्वितीया वार्ता श्रूयताम्। रशिया-देशे एकः व्यवसायी स्वकीयाय विहाराय एकं विशालं मध्यकालीनं दुर्गं रचितवान् अस्ति। तद् दुर्गं क्रेतुं कोऽपि ग्राहकः न प्राप्तः। अतः सः चिन्ताकुलः जातः।

**काव्या-** सत्यम्! आधुनिके युगे मध्यकालीनं दुर्गं क्रेतुं कस्य इच्छा भवेत्? तेन व्यवसायि-महोदयेन धनस्य अपव्ययः कृतः। अस्तु, इतः परं तृतीयां वार्तां शृणु। आस्ट्रेलिया-देशस्य अरण्ये वैज्ञानिकाः एकां विचित्राम् 'प्रक्षेपणी-लूताम्' दृष्टवन्तः सन्ति। सा लूता शत्रुपिपीलिकाः आकाशे क्षिपति। तया पिपीलिकानां ग्रहणाय तन्तुजालं निर्मितम्।

**नन्दिनी-** अद्भुतं खलु! प्रकृत्याः कौतुकं नूतनैः जीवैः सर्वदा प्रकटीक्रियते। तया लूतया निर्मितेन तन्त्रेण वैज्ञानिकानाम् अपि आश्चर्यम् जनितम्। अद्यतनीनां वार्तानां प्रस्तुतिः अत्रैव समाप्यते। श्वः पुनर्मेलिष्यामः। धन्यवादः।

# कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये स्नातक- (बी.ए.) स्नातकोत्तर- (एम.ए., पीएच. डी.) पाठ्यक्रमेषु प्रवेशप्रक्रिया आरब्धा





**हिमसंस्कृतवार्ताः- नागपुरम्।**
कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः महाराष्ट्रस्य संस्कृतभाषां प्रति समर्पितः एकमात्रः विश्वविद्यालयः वर्तते। राष्ट्रीय- प्रत्यायन- एवं- मूल्याङ्कन- परिषदा (NAAC) विश्वविद्यालयाय 'A+' मानाङ्कनं प्रदत्तम् अस्ति। विविधाः शैक्षणिकपाठ्यक्रम्याः, नवोन्मेषि-कार्यक्रमाः, मौलिकं शोधकार्यं, अङ्कीय (डिजिटल)- युगानुकूलाः सर्वे प्रशासनिक- शैक्षणिक- ग्रन्थालयीय- व्यापाराः, प्राकृतिकसौन्दर्ययुक्तः परिसरः, उच्चगुणवत्तावन्तः प्राध्यापकाः, छात्रहितैषि- प्रशासनं च एताभिः विशेषताभिः कालिदासविश्वविद्यालयस्य ख्यातिः सम्पूर्णे भारते विस्तीर्णा अस्ति। विश्वविद्यालये समग्रभारतात् छात्राः अध्ययनाय आगच्छन्ति तथा च विदेशेभ्यः अपि बहवः विद्यार्थिनः अन्तर्जाल (ऑनलाइन)- पाठ्यक्रमेषु प्रवेशं गृह्णन्ति।
प्रतिवर्षमिव शैक्षणिकसत्र- २०२६-२७ कृते विश्वविद्यालये (रामटेके) संस्कृतस्य पारम्परिकविषयेषु- वेद- व्याकरण- दर्शन- साहित्य- ज्योतिषेषु 'बी.ए. शास्त्री', 'एम.ए. आचार्य' सदृशैः पारम्परिक- पाठ्यक्रमैः साकमेव संस्कृत- मराठी- आङ्ग्लसदृशीषु भारतीय- आधुनिकभाषासु साहित्यविषयेषु च, योगशास्त्र-मराठी-वाणिज्य (कॉमर्स) बीबीए- बीसीए- लोकप्रशासनादिषु आधुनिकविषयेषु स्नातक- स्नातकोत्तरस्तरयोः विभिन्नेषु पाठ्यक्रमेषु प्रवेशः आरब्धः अस्ति। दशमीकक्षाम् उत्तीर्णानां छात्राणां कृते उच्चमाध्यमिक- (एकादश- द्वादशकक्षयोः समकक्षायाः) 'प्राक्शास्त्री' पाठ्यक्रमस्यापि प्रवेशप्रक्रिया प्रचलति।
शैक्षणिकसत्र- २०२६-२७तः भारतीयज्ञानप्रणाली- आधारितः 'एम.ए. भारतीयज्ञानपरम्परा', 'एम.ए. भारतीयशास्त्रीयज्ञानपरम्परा' इति द्वौ शोध- आधारितौ आचार्य (स्नातकोत्तर)-पाठ्यक्रमौ तथा 'B.Sc./ M.Sc. Yogic Science' इति द्वौ विशेषपाठ्यक्रमौ रामटेकपरिसरे आरभ्येते। संस्कृतेन सह उपर्युक्तानाम् आधुनिकविषयाणां पाठ्यक्रमाणां लाभः स्थानीय-रामटेकस्य छात्रेभ्यः तु भविष्यति एव, अनेन साकमेव विश्वविद्यालयस्य 'अभिनवभारती' (वारङ्गा), नागपुरपरिसरे, विश्वविद्यालयस्य घोषितचतुर्षु उपकेन्द्रेषु च अस्मिन् वर्षे 'रत्नागिरि' उपकेन्द्रे अपि एतेषां सुचारु- आयोजनं भविष्यति, येन महाराष्ट्रस्य प्रान्ते-प्रान्ते स्थिताः विद्यार्थिनः लाभान्विताः भवेयुः।
विश्वविद्यालयस्य विभिन्नपाठ्यक्रमेषु प्रवेशं गृह्णद्भ्यः छात्रेभ्यः संस्कृतसम्बद्धेषु विविधपाठ्यक्रमेषु छात्रवृत्तिः (शिष्यवृत्तिः), छात्रावासः, भोजनालयः इत्यादि-मूलभूतसुविधाभिः अतिरिक्तं सङ्गणककक्षः (कंप्यूटर लैब), केन्द्रीय- अङ्कीय- ग्रन्थालयः (डिजिटल लाइब्रेरी), प्रतियोगात्मक- परीक्षाभ्यः मार्गदर्शनं, चिकित्सासुविधा, योगासनवर्गः, 'ग्रीन जिम' इत्याद्याः बह्व्यः सुविधाः उपलप्स्यन्ते। स्थानीय- राज्य- देश- विदेशेभ्यः प्रवेशं लभमानानां सर्वेषां छात्राणां कृते शिक्षा- शोधक्षेत्रयोः इमे पाठ्यक्रमाः विशेषलाभप्रदाः सन्ति, अतः विश्वविद्यालये प्रवेशार्थं छात्रेषु व्यापकः उत्साहः दृश्यते।
प्रवेशसम्बद्धायाः अधिकसूचनायाः कृते समये समये विश्वविद्यालयस्य जालपुटे (वेबसाइट) https://kksanskrituni.digitaluniversity.ac/ गच्छन्तु अथवा ९९६०४३५७३०/ ९४२३६४८८७१ एतेषु दूरभाषक्रमाङ्केषु सम्पर्कं कुर्वन्तु इति आह्वानं रामटेकपरिसरस्य सञ्चालकेन प्रो. हरेकृष्णअगस्तीमहोदयेन कृतम् अस्ति।

# जीवनपर्यन्तं गीतं लेखिष्यामि...

जीवनपर्यन्तं गीतं लेखिष्यामि,
अक्षरे अक्षरे प्रीतिं लेखिष्यामि।
शब्दाः केऽपि अर्थाः केऽपि भवन्तु वा,
भावेषु मनमीतम् लेखिष्यामि।
श्वासानाम् अविरल-मालायाम्,
तव नाम्नो मुक्ताः गुम्फिताः।
मुक्ता मुक्ता अङ्गुलीषु नर्तिता,
मौनं जपिष्यामि न मुक्ताः गणयिष्यामि।।

घनान्धकारे रुद्धा तूलिका,
एतत् मह्यं न हि स्वीकृतम्।
हृदयस्योज्ज्वल-देहल्यै,
स्मृतीनां दीपं धरिष्यामि।।

दैहिकं सामाजिकं बन्धनं नास्ति,
प्रेम शाश्वतम् निष्पापम् अमरं च।
संयोगो वा वियोगो वा भो सखे,
इमां तु जगतो रीतिं लेखिष्यामि।।

प्रीतिर्न हि अश्वत्थ-पत्र-सदृशी,
प्रीतिरविनाशि अश्वत्थ-बीजमिव।
समयस्य निष्ठुर-प्राचीरेषु,
प्रेम्ण एव विजयं लेखिष्यामि।।

पङ्के वा कण्टकेषु वा,
पुष्पाणि सदैव हि विकसन्ति।
अश्रुसिक्तायाम् उर्वरा-भूमौ,
अमित-प्रेम्णो नीतिं लेखिष्यामि।।



**डॉ. महिमा शुक्ला "उत्तरायणी"**
हिमसंस्कृतवार्ताः




# एह केहड़ा ज़माना आई गया

देखा ओ लोको ए केहड़ा ज़माना आई गया
प्यार कने भाईचारे रा पवाड़ा पाई गया
देखा ओ लोको .........

भाई भाईए रा दुश्मण हुई गया
अप्पुं च रहया नियाँ प्यार
दुश्मण बणी गए हुण अप्पुं चिएँ
बंडणे पए घर बार
नफरता रा गर्दो ग्वार छाई गया
देखा ओ लोको ............

दराणियां जठाणियाँ अप्पुं च नी गलान्दियाँ
कड़वे वाणा रियाँ छुरियाँ इक्की दूजे पर चलान्दियाँ
भाई भी हुण अप्पुं च नी गलान्दे
सैजे कदी नी जुदा हुणे री कसमा थे खाँदे
भाईए जो भाईए ते लग्ग कराई गया
देखा ओ लोको........

पहलके जमाने च सब मिली जुली थे रहन्दे
हुण सै गल्ल नी
कट्ठे हुई कने दुख मुसीबताँ थे सहन्दे
हुण सै गल्ल नी
अपणा अपणा हुणे रा रोग लगाई गया
देखा ओ लोको .................

गावाँ गावाँ च बणी गई सड़कां
जेबाँ जेबाँ च हुई गए मोबाइल फोन
कारां सबीं रखी लई
बेंकाँ ते लई कने लोन
ज़ेबा च सैजे थोड़ा बचया था
तिसजो दारू कने चिट्टा खाई गया
देखा ओ लोको.........

गावाँ गावाँ च खुली गए स्कूल
जगह जगह हुई गए कॉलेज हुण कोई अनपढ़ नी रहणा
सबीं जो हुई जाणी थोड़ी बहुत नॉलेज
डाक्टर कने इंजीनियर बणने रा रोग लगाई गया
देखा ओ लोको..............

बौड़ियाँ खतम हुई गी हेंडपंप लगी गए
पाणी आवे पावें ना आवे घरें घरें नल़के लगी गए
घड़े रे पाणिए रा स्वाद हुण किस्मती वाला ई पाई गया
देखा ओ लोको.........

लोहड़िया जो सब कट्ठे गिट्ठा जलांदे थे
पोहलणियाँ पांदे थे गीतां गांदे थे
दयाल़िया जो दिये जल़ांदे थे
बधिया बधिया पकवान बणान्दे थे
घेरसू बाल़दे थे अइंकल़ियाँ खाँदे थे
गिट्ठे रियां लकड़ियाँ मंगणे
सब मिली जुली जांदे थे
आपसी प्यार मिटाई गया
बिच जुदाईया री रेखा सै पाई गया
देख ओ लोको ...........

कुड़ियाँ जो जमणे ते पहले ई पया कराईं मार
डाक्टर गुर्दे कड्डी कने नट्ठेया कराएं बाहर
नेता अपणे स्वार्था खातर लोकाँ जो लड़ाया कराएँ
अपणे बोटां री राजनीति चमकाया कराएँ
नौजवाना रिया पीढ़िया जो नशे री लत लगाई गया
देखा ओ लोको ..

गुरु चेले रा रिश्ता करी
त्या तार तार
कुड़ियाँ जो कल्ले नी
भेजी नी सकदे बाहर
भेड्डा रिया खला च
बैठिरे भेड़िये
सैजे दुनिया जो करेया
कराएँ शर्म शार
बहुआं जो मारेया
कराएँ दहेजा रे लोभी
औरतां ने हुया कराईं
जबर्दस्ती
क्या इस जमाने च
मावाँ कने बहणा री
इज़्ज़त
हुई गईरी इतनी सस्ती
खूना रेयाँ रिश्तेयाँ जो
पाणी बणाई गया
देखा ओ लोको केहड़ा
ज़माना आई गया

**रवींद्र कुमार शर्मा**
**घुमारवीं,बिलासपुर**
**9418093882**




हिमसंस्कृतवार्ताः